# Shlokas to be Recited during Study of Shrimad RamayanaM

# શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ વૈષ્ણવ

## Document Information

Text title : Shlokas to be Recited (vaiShNava sampradAya) during Study of Shrimad Ramayanam

File name : rAmAyaNapaThanopakramopasaMhArakramaHvaiShNava.itx

Category : raama, dhyAnam, mangala

Location : doc_raama

Transliterated by : N. Seshadri nsesha92@yahoo.in, Aruna Narayanan

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : January 21, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 22, 2023

*sanskritdocuments.org*

# શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ વૈષ્ણવ

(Dhyana Shloka to be recited before the commencement of Parayanam)

॥ વૈષ્ણવસમ્પ્રદાયઃ ॥

શ્રીઃ

શ્રીમતે રામાનુજાય નમઃ

શ્રીમતે નિગમાન્તમહાદેશિકાય નમઃ

॥ વૈષ્ણવાનાં શ્રીમદ્રામાયણપઠનોપક્રમે અનુસન્ધેયાઃ ધ્યાનશ્લોકાઃ ॥

॥ શ્રીઃ ॥

રામાનુજ દયાપાત્રં જ્ઞાનવૈરાગ્ય ભૂષણમ્ ।
શ્રીમદ્વેઙ્કટનાથાર્યં વન્દે વેદાન્તદેશિકમ્ ॥ ૧॥

લક્ષ્મીનાથસમારમ્ભાં નાથયામુનમધ્યમામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥ ૨॥

યો નિત્યમચ્યુતપદામ્બુજયુગ્મરુક્મ
    વ્યામોહતસ્તદિતરાણિ તૃણાયમેને ।
અસ્મદ્ગુરોર્ભગવતોસ્ય દયૈકસિન્ધોઃ
    રામાનુજસ્ય ચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

માતા પિતા યુવતયસ્તનયા વિભૂતિઃ
    સર્વં યદેવ નિયમેન મદન્વયાનામ્ ।
આદ્યસ્ય નઃ કુલપતેર્વકુળાભિરામં
    શ્રીમત્ તદઙ્ઘ્રિયુગલં પ્રણમામિ મૂર્ધ્ના ॥ ૪॥

ભૂતં સરશ્ચ મહદાહ્વય ભટ્ટનાથ
    શ્રીભક્તિસાર કુલશેખર યોગિવાહાન્ ।
ભક્તાઙ્ઘ્રિરેણુ પરકાલ યતીન્દ્ર મિશ્રાન્
    શ્રીમત્ પરાઙ્કુશમુનિં પ્રણતોસ્મિનિત્યમ્ ॥ ૫॥

પિતામહસ્યાપિ પિતામહાય
    પ્રાચેતસાદેશ ફલપ્રદાય ।
શ્રીભાષ્યકારોત્તમ દેશિકાય
    શ્રીશૈલ પૂર્ણાય નમો નમસ્તે ॥ ૬॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥ ૭॥

યસ્ય દ્વિરદવક્ત્રાદ્યાઃ પારિષદ્યાઃ પરઃ શતમ્ ।
વિઘ્નં નિઘ્નન્તિ સતતં વિષ્વક્સેનં તમાશ્રયે ॥ ૮॥

જ્ઞાનાનન્દમયં દેવં નિર્મલસ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥ ૯॥

કૂજન્તં રામરામેતિ મધુરં મધુરાક્ષરમ્ ।
આરુહ્ય કવિતાશાખાં વન્દે વાલ્મીકિકોકિલમ્ ॥ ૧૦॥

વાલ્મીકેર્મુનિસિંહસ્ય કવિતાવનચારિણઃ ।
શ ૃણ્વન્ રામકથાનાદં કો ન યાતિ પરાં ગતિમ્ ॥ ૧૧॥

યઃ પિબન્ સતતં રામચરિતામૃતસાગરમ્ ।
અતૃપ્તસ્તં મુનિં વન્દે પ્રાચેતસમકલ્મષમ્ ॥ ૧૨॥

ગોષ્પદીકૃતવારાશિં મશકીકૃતરાક્ષસમ્ ।
રામાયણમહામાલારત્નં વન્દેઽનિલાત્મજમ્ ॥ ૧૩॥

(હનુમાન્ અઞ્જનાસૂનુઃ વાયુપુત્રો મહાબલઃ ।
રામેષ્ટઃ ફલ્ગુનસખઃ પિઙ્ગાક્ષોઽમિતવિક્રમઃ ॥

ઉદધિક્રમનશ્ ચૈવ સીતાશોક વિનાશકઃ
લક્ષ્મણ પ્રાનદાતાશ્ચ દશગ્રીવસ્ય દર્પહા ॥)
અઞ્જનાનન્દનં વીરં જાનકીશોકનાશનમ્ ।
કપીશમક્ષહન્તારં વન્દે લઙ્કાભયઙ્કરમ્ ॥ ૧૪॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥ ૧૫॥

ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં
    યઃ શોકવહ્નિં જનકાત્મજાયાઃ ।

આદાય તેનૈવ દદાહ લઙ્કાં
    નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ૧૬॥

આઞ્જનેયમતિપાટલાનનં કાઞ્ચનાદ્રિકમનીયવિગ્રહમ્ ।
પારિજાતતરુમૂલવાસિનં ભાવયામિ પવમાનનન્દનમ્ ॥ ૧૭॥

યત્ર યત્ર રઘુનાથ કીર્તનં તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
બાષ્પવારિપરિપૂર્ણલોચનં મારુતિં નમત રાક્ષસાન્તકમ્ ॥ ૧૮॥

વેદવેદ્યે પરે પુંસિ જાતે દશરથાત્મજે ।
વેદઃ પ્રાચેતસાદાસીત્ સાક્ષાદ્રામાયણાત્મના ॥ ૧૯॥

ચરિતં રઘુનાથસ્ય શતકોટિપ્રવિસ્તરમ્ ।
એકૈકમક્ષરં પ્રોક્તં મહાપાતકનાશનમ્ ॥ ૨૦॥

શૃણ્વન્ રામાયણં ભક્ત્યા યઃ પાદં પદમેવ વા ।
સ યાતિ બ્રહ્મણઃ સ્થાનં બ્રહ્મણા પૂજ્યતે સદા ॥ ૨૧॥

વાલ્મીકિ ગિરિ સમ્ભૂતા રામસાગરગામિની ।
પુનાતુ ભુવનં પુણ્યા રામાયણ મહાનદી ॥ ૨૨॥

શ્લોકસારસમાકીર્ણં સર્ગકલ્લોલસંકુલમ્ ।
કાણ્ડગ્રાહમહામીનં વન્દે રામાયણાર્ણવમ્ ॥ ૨૩॥

યઃ કર્ણાઞ્જલિ સમ્પુટૈરહરહઃ સમ્યક્ પિબત્યાદરાત્
    વાલ્મીકેર્વદનારવિન્દગલિતં રામાયણાખ્યં મધુ ।
જન્મવ્યાધિજરાવિપત્તિમરણૈરત્યન્તસોપદ્રવં
    સંસારં સ વિહાય ગચ્છતિ પુમાન્ વિષ્ણોઃ પદં શાશ્વતમ્ ॥ ૨૪॥

તદુપગતસમાસસન્ધિયોગં
    સમમધુરોપનતાર્થવાક્યબદ્ધમ્ ।
રઘુવરચરિતં મુનિપ્રણીતં
    દશશિરસશ્ચ વધં નિશામયધ્વમ્ ॥ ૨૫॥

શ્રીરાઘવં દશરથાત્મજમપ્રમેયં
    સીતાપતિં રઘુકુલાન્વયરત્નદીપમ્ ।
આજાનુબાહુમરવિન્દદલાયતાક્ષં
    રામં નિશાચરવિનાશકરં નમામિ ॥ ૨૬॥

વૈદેહી સહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
    મધ્યેપુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
    વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૨૭॥

(વામે ભૂમિસુતા પુરશ્ચ હનુમાન્ પશ્ચાત્ સુમિત્રાસુતઃ
    શત્રુઘ્નો ભરતશ્ચ પાર્શ્વદલયોઃ વાય્વાદિકોણેષુ ચ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારાસુતો જામ્બવાન્
    મધ્યે નીલ સરોજ કોમળરુચિં રામં ભજે શ્યામળમ્ ॥)
આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ ।
લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૨૮॥

ધર્માત્મા સત્યસન્ધશ્ચ રામો દાશરથિર્યદિ ।
પૌરુષેચાઽપ્રતિદ્વન્દ્વઃ શરૈનં જહિ રાવણિમ્ ॥ ૨૯॥

તપઃસ્વાધ્યાયનિરતં તપસ્વી વાગ્વિદાં વરમ્ ।
નારદં પરિપપ્રચ્છ વાલ્મીકિર્મુનિપુઙ્ગવમ્ ॥ ૩૦॥

॥ શ્રીરઘુનન્દન પરબ્રહ્મણે નમઃ ॥

॥ ઇતિ શ્રીમદ્રામાયણપઠનોપક્રમે અનુસન્ધેયાઃ શ્લોકાઃ સમાપ્તાઃ ॥

## શ્રીમદ્રામાયણપારાયણસમાપનક્રમઃ

॥ શ્રીમદ્રામાયણ પારાયણસમાપને અનુસન્ધેયાઃ મઙ્ગલશ્લોકાઃ ॥

એવમેતત્પુરાવૃત્તમાખ્યાનં ભદ્રમસ્તુ વઃ ।
પ્રવ્યાહરત વિસ્રબ્ધં બલં વિષ્ણોઃ પ્રવર્ધતામ્ ॥ ૧॥

લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાભવઃ ।
યેષામિન્દીવરશ્યામો હૃદયે સુપ્રતિષ્ઠિતઃ ॥ ૨॥

કાલે વર્ષતુ પર્જન્યઃ પૃથિવી સસ્યશાલિની ।
દેશોઽયં ક્ષોભરહિતો બ્રાહ્મણાઃ સન્તુ નિર્ભયાઃ ॥ ૩॥

કાવેરીવર્ધતાં કાલે કાલે વર્ષતુ વાસવઃ ।
શ્રીરઙ્ગનાથો જયતુ શ્રીરઙ્ગશ્રીશ્ચ વર્ધતામ્ ॥ ૪॥

સ્વસ્તિ પ્રજાભ્યઃ પરિપાલયન્તાં

ન્યાય્યેન માર્ગેણ મહીં મહીશાઃ ।
ગોબ્રાહ્મણેભ્યઃ શુભમસ્તુ નિત્યં
લોકાઃ સમસ્તાઃ સુખિનો ભવન્તુ ॥ ૫॥

(મઙ્ગળં ભગવાન્ વિષ્ણુઃ મઙ્ગળં મધુસૂદનઃ ।
મઙ્ગળં પુણ્ડરીકાક્ષઃ મઙ્ગળં ગરુડધ્વજઃ ॥)
મઙ્ગલં કોસલેન્દ્રાય મહનીયગુણાબ્ધયે ।
ચક્રવર્તિતનૂજાય સાર્વભૌમાય મઙ્ગલમ્ ॥ ૬॥

વેદવેદાન્તવેદ્યાય મેઘશ્યામલમૂર્તયે ।
પુંસાં મોહનરૂપાય પુણ્યશ્લોકાય મઙ્ગલમ્ ॥ ૭॥

વિશ્વામિત્રાન્તરઙ્ગાય મિથિલાનગરીપતેઃ ।
ભાગ્યાનાં પરિપાકાય ભવ્યરૂપાય મઙ્ગલમ્ ॥ ૮॥

પિતૃભક્તાય સતતં ભ્રાતૃભિઃ સહ સીતયા ।
નન્દિતાખિલલોકાય રામભદ્રાય મઙ્ગલમ્ ॥ ૧૦॥

ત્યક્તસાકેતવાસાય ચિત્રકૂટવિહારિણે ।
સેવ્યાય સર્વયમિનાં ધીરોદારાય મઙ્ગલમ્ ॥ ૧૦॥

સૌમિત્રિણા ચ જાનક્યા ચાપબાણાસિધારિણે ।
સંસેવ્યાય સદા ભક્ત્યા સ્વામિને મમ મઙ્ગલમ્ ॥ ૧૧॥

દણ્ડકારણ્યવાસાય ખણ્ડિતામરશત્રવે ।
ગૃધ્રરાજાય ભક્તાય મુક્તિદાયાસ્તુ મઙ્ગલમ્ ॥ ૧૨॥

સાદરં શબરીદત્તફલમૂલાભિલાષિણે ।
સૌલભ્યપરિપૂર્ણાય સત્ત્વોદ્રિક્તાય મઙ્ગલમ્ ॥ ૧૩॥

હનુમત્સમવેતાય હરીશાભીષ્ટદાયિને ।
વાલિપ્રમથનાયાસ્તુ મહાધીરાય મઙ્ગલમ્ ॥ ૧૪॥

શ્રીમતે રઘુવીરાય સેતૂલ્લઙ્ઘિતસિન્ધવે ।
જિતરાક્ષસરાજાય રણધીરાય મઙ્ગલમ્ ॥ ૧૫॥

આસાદ્ય નગરીં દિવ્યાં અભિષિક્તાય સીતયા ।
રાજાધિરાજરાજાય રામભદ્રાય મઙ્ગલમ્ ॥ ૧૬॥

(વિભીષણકૃતે પ્રીત્યા લઙ્કાભીષ્ટ પ્રદાયિને ।

સર્વલોક શરણ્યાય શ્રીરાઘવાય મઙ્ગળમ્ ॥

ભ્રહ્માદિ દેવસેવ્યાય ભ્રહ્મણ્યાય મહાત્મને ।
જાનકી પ્રાણનાથાય રઘુનાથાય મઙ્ગળમ્ ॥)
મઙ્ગલાશાસનપરૈઃ મદાચાર્યપુરોગમૈઃ ।
સર્વૈશ્ચ પૂર્વૈરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૭॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
 બુદ્ધ્યાઽઽત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ
 નારાયણાયેતિ સમર્પયામિ ॥ ૧૮॥

॥ ઇતિ શ્રીમદ્રામાયણ પારાયણ સમાપને અનુસન્ધેયાઃ શ્લોકાઃ સમાપ્તાઃ ॥

Encoded and proofread by
N. Seshadri nsesha92 at yahoo.in,
Aruna Narayanan narayanan.aruna at gmail.coM

*Shlokas to be Recited during Study of Shrimad RamayanaM*
pdf was typeset on January 22, 2023

Please send corrections to *sanskrit@cheerful.com*